# आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम्। अयं सिद्धान्तः पुस्तकीय-ज्ञानस्य तस्मात् न्यासाद् विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधि विद्यालयस्य गृहस्य च मध्ये अन्तरालं विरचितवती अस्ति। नूतन-राष्ट्रिय-पाठ्यचर्याधारिताः पाठ्यक्रमाः पाठ्यपुस्तकानि च एतम् आधारभूतविचारं क्रियान्वयितुम् एकः प्रयासः अस्ति। एतस्मिन् प्रयासे प्रत्येकं विषयस्य दृढभित्त्या आवरणस्य अथ च सूचना-संस्मारणस्य प्रवृतेः विरोधः समाविष्टः अस्ति। आशासे यत् एते प्रयासाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितायाः बालकेन्द्रित-व्यवस्थायाः दिशि सुदूरं नेष्यन्ति।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशील-गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणाधिगमसमये स्वीयेषु अनुभवेषु चिन्तनं कर्तुम् कियतः अवसरान् प्रददति। अस्माभिः एतत् मन्तव्यं यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः समर्पितया सूचना-सामग्र्या सह युक्त्वा सङ्घर्षं च कृत्वा नूतन-ज्ञानस्य सर्जनं कुर्वन्ति। शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकस्य परीक्षायाः एकमात्रम् आधारत्वेन निर्माणस्य प्रवृत्तिः अस्ति। सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् वयं बालकान् शिक्षणस्य प्रक्रियायां पूर्ण-सहभागित्वेन अङ्गीकुर्मः तथा च तेषां सहभागितां सुनिश्चिनवाम, ते बालकाः ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति चिन्तनं त्यक्तव्यम्।

एतानि उद्देश्यानि विद्यालयस्य दैनिक-जीवने कार्यशैल्यां च भृशं परिवर्तनं इच्छन्ति। दैनन्दिन्यां समय-सारण्यां नमनीयत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिक-दिनदर्शिकायाः क्रियान्वयने जागरुकता, येन शिक्षणार्थं नियत-दिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात्। शिक्षण-मूल्याङ्कनयोः विधयः अपि एनं विषयं निश्चेष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनेभ्यः मानसिकोद्वेगस्य खिन्नतायाः च स्थाने हर्षं प्रदातुं कियत् प्रभावि सिध्यति। भारस्य समस्यायाः समाधानार्थं पाठ्यक्रम-निर्मातृभिः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारण-समये बालानां मनोविज्ञानाय एवञ्च अध्यापनाय उपलब्ध-समयस्य ध्यानं दातुं पूर्वापेक्षया अधिकः सचेष्टः प्रयत्नः कृतः अस्ति। एषः प्रयासः इतोऽपि गभीरतया स्यात् इति प्रयत्ने इदं पाठ्यपुस्तकं चिन्तनाय, विस्मयाय, लघुसमूहेषु वार्तालापाय तर्काय एवं च चर्चायै तथा च हस्ताभ्यां क्रियमाणेभ्यः गतिविधिभ्यः प्राथमिकतां प्रयच्छति।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायै निर्मितायाः पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कार्तज्ञ्यं प्रकटीकरोति। परिषद् सामाजिक-विज्ञान-पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षं आचार्यहरि-वासुदेवन्-महोदयं प्रति तथा च एतस्याः पाठ्यपुस्तक-समितेः मुख्य-परामर्शदात्रीं विभापार्थसारथीमहोदयां प्रति विशेषरूपेण आभारं प्रकटयति। एतस्य पाठ्यपुस्तकस्य वर्धने बहुभिः शिक्षकैः योगदानं कृतम्। एतद् योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि अभारिणः स्मः। वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः यैः स्वीय-सामग्रीणां संसाधनानाम् एवं च सहयोगिनां साहाय्यस्य स्वीकरणे औदार्यपूर्वकं सहयोगः कृतः। वयं माध्यमिकोच्चशिक्षा-विभाग-मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य आचार्यमृणाल-मीरीमहोदयस्य एवं आचार्यजी.पी.देशपाण्डे-महोदयस्य आध्यक्ष्ये निर्मितायाः निरीक्षण-समितेः तान् सदस्यान् प्रति धन्यवादवचांसि व्यवहरामः ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः। व्यवस्थागत-संस्करणेषु स्वीय-प्रकाशनेषु च नैरन्तर्येण परिष्काराय समर्पिता परिषद् टिप्पणीः परामर्शान् च स्वागतीकरिष्यति येन भाविसंशोधनेषु साहाय्यं स्वीकर्तुं शक्येत।

निदेशकः

राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषद्

नवदेहली

२० दिसम्बरः २००५

# पाठ्यपुस्तकनिर्माणसमितिः

अध्यक्षः, सामाजिकविज्ञानपाठ्यपुस्तक-परामर्शदातृ-समितिः

हरीवासुदेवनः, प्रोफेसरः, इतिहासविभागः, कलकत्ताविश्वविद्यालयः, कोलकाता।

**मुख्यपरामर्शदाता**

शारदाबालगोपालनः, सेंटर फार द स्टडी आफ डेवलपिंग सोसाइटीज, राजपुररोड, नवदेहली।

**सदस्याः**

अजंलिनरोना, एकलव्य-शैक्षिकशोध-नवाचार-संस्थानम्,मध्यप्रदेशः।

अरविंदसरदाना, एकलव्यशैक्षिकशोध-नवाचार-संस्थानम्, मध्यप्रदेशः।

दिप्ताभोगः, निरन्तर-सेंटर फार जेंडर एवं शिक्षासंदर्भसमूहः, सर्वोदय-इन्कलेव-नवदेहली।

जयासिंहः, प्रवक्ता, डी.ई.एस.एच, एन.सी.ई.आर.टी

कृष्णामेननः, रीडर,लेडी-श्रीराम-कालेज, दिल्लीविश्वविद्यालयः, दिल्ली।

लतिकागुप्ता,परामर्शदात्री,डी.ई.ई.,एन.सी.ई.आर.टी।

मोहनदेशपाण्डे, समन्वयकः, आभा (आरोग्यमान), पुणे।

एम.वी.श्रीनिवासनः, प्रवक्ता, डी.ई.एस.एस.एच.एन.सी.ई.आर.टी।

संजयदुबे, रीडर, डी.ई.एस.एस.एच., एन, सी.ई.आर.टी।

शोभा वाजपेयी, शासकीयमाध्यमिकविद्यालयः, उडा.जनपदं हरदा.मध्यप्रदेशः।

स्वातिवर्मा, हेरिटेजस्कूल, रोहिणी, दिल्ली।

**सदस्यः समन्वयकः च**

डब्ल्यू.थेमीचोनरेमसनः, प्रवक्ता, एन.सी.ई.आर.टी, नवदेहली।

# भारतीय-संविधानम्

## उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं [1]**[सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पंथ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं]** निर्मातुं तथा च तस्य समस्तनागरिकाणां कृते;

सामाजिकम् आर्थिकं तथा च राजनैतिकं न्यायम्, विचारस्य, अभिव्यक्तेः, विश्वासस्य, धर्मस्य,

उपासनायाः च स्वतन्त्रताम्,

प्रतिष्ठायायाः अवसरस्य च समतां

प्रापयितुं

तथा च तेषु **सर्वेषु** मानवीयगौरवस्य तथा च [2]**[राष्ट्रियैकतायाः अखण्डतायाश्च]** **सुनिश्चयकर्त्री** बन्धुतां संवर्धयितुं.......

दृढसंकल्पाः भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य नवम्बरमासस्य 26 तमे दिनाङ्के1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः ।**

1. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "प्रभुत्व-सम्पन्नलोकतन्त्रात्मक-गणराज्यम्" इत्यस्य स्थाने प्रतिस्थापितम् ।

2. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "राष्ट्रस्य एकताः" इत्यस्य स्थाने प्रतिस्थापितम् ।

# आभारः


इदं पाठ्यपुस्तकं केवलं लेखकसमूहस्य प्रयासानां परिणामः नास्ति। पुस्तकनिर्माणस्य क्रमे अस्माकं सहकर्मिणः मित्राणि च पृथक्-पृथक्-प्रकारेण स्वस्य समयं सहयोगं च दत्तवन्तः। अस्माकम् आन्तरिक-समीक्षा-समितेः सदस्यरूपेण मेरी-जॉनः एस.मोहिन्दरः,आदित्यनिगमः तथा च सी.एन.सुब्रह्मण्यमः यथाकालं स्वस्य महत्त्वपूर्णैः परामर्शैः अस्माकं मार्गदर्शनं कृतवन्तः। सार्धमेव सौलीबेंजामिनः राजीवभार्गवः साराजोसफः अनुगुप्ता प्रभुमहापात्रः फराहनकवी अवधेन्द्रशरणः सुजीतसिन्हा भूपेन्द्रयादवः तथा च योगेन्द्रयादवः पृथक्-पृथक्-पाठेषु स्वटिप्पणीं प्रदत्तवन्तः।एलेक्स-एम.जार्जः एकस्मिन् पाठे विशेषेण परामर्शदानाद् आरभ्य स्रोतसामग्र्याः अन्वेषणे च सक्रियभूमिकां निर्वोढवान्। केशवदासः एकस्मिन् पाठे विशेषरूपेण योगदानं कृतवान्। सुमंगलादासः अस्माकं कृते इप्टायाः गीतस्य उपलब्धिं कारितवती यस्य प्रयोगं वयं स्वस्य प्रथमे पाठे कृतवन्तः। बेनः अस्माकं कृते नागालैंडस्य चिमाजीग्रामे तण्डुलस्य कृषेः विषये सूचनां दत्तवान्। एतदतिरिच्य वयं विशेषरूपेण उर्वशीबुटालियां प्रति आभारं व्यक्तीकुर्मः यस्याः पार्श्वे न्यूनः कालः आसीत् पुनरपि सा आङ्गलसंस्करणस्य सम्पादनं कर्तुं स्वीकृतवती। तया कृतसम्पादनस्य कारणतः पुस्तकस्य गुणवत्ता वर्धिता अस्ति।

अस्य पुस्तकस्य सम्पादने विषयवस्तुनः विषये च परामर्शं दातुं वयं विशेषेण पूर्वाभारद्वाजस्य कृते धन्यवादज्ञापनं कर्तुमिच्छामः। तस्याः कार्ये अरविन्दसरदाना शोभावाजपेई टुलटुलविश्वासः प्रकाशकान्तः तथा च सुप्रियापाठकः अपि पर्याप्तं सहयोगं कृतवन्तः। लतिकागुप्ता सर्वेषां पाठानां प्रारम्भिकमनुवादं कृतवती तथा च पश्चाद् अपि तेषाम् उपरि धैर्यपूर्वकं कार्यं कृतवती।

आर.के.लक्ष्मणः (दि-टाइम्स-ऑफ-इण्डिया) शीलाधीरः पोइली-सेन-गुप्ता तथा च अंजलि मांटेरियो स्वस्य रचनानाम् उपयोगं कर्तुम् अनुमतिं दत्तवन्तः। पेंइगुइन-तूलिके महाराष्ट्रसर्वकारः च अपि स्वप्रकाशनस्य उपयोगं कर्तुम् अनुमतिं दत्तवन्तः।

चित्राङ्कनस्य कार्ये ज्येष्ठैः सह बालकैः अपि सहयोगः प्रदत्तः। शासकीयमाध्यमिकविद्यालयः उडा जनपदं हरदायाः बालकाः अपि ग्रामे जायमानां कार्याणां विषये चित्राङ्कनं कृतवन्तः। तेषां चित्राणां कोलाज इत्येतेषां ग्रामीणक्षेत्रेषु आजीविकाम् अवबोधयितुं प्रयोगः कृतः अस्ति। अदितेः ऐश्वर्यायाः अनीशायाः स्वराल्याः मीनाक्ष्याः सहरस्य च चित्राणाम् उपयोगः एतस्मिन् पुस्तके कृतमस्ति। तेषु या विविधता अस्ति तस्याः माध्यमेन विविधतायाः अवधारणां ज्ञातुं साहाय्यं लब्धमस्ति।

चित्राङ्कनं मुख्यरूपेण विशाखाप्रकाशनस्य अस्ति। सः यया सूक्ष्मतया लग्नशीलतया च पाठानाम् आवश्यक्तायाः अनुरूपं चित्राङ्कनं कृतवान् ततः पुस्तकमेतन्नावीन्यम् उपगतम्। एतदर्थं सः धन्यवादार्हः अस्ति। प्रथमे पाठे समीरस्य कथायाः उपरि आधारितचित्रं शाश्वतीचौधरी रचितवती। वयं तस्याः आभारिणः स्मः।

पुस्तके प्रयुक्तानि अन्यानि सर्वाणि चित्राणि अस्मभ्यं डाउन-टू-अर्थेन तथा च हिन्दुस्तानटाइम्स इत्यनेन प्रदत्तानि। वयं विशेषेण आउटलुकसमूहं प्रति आभारिणः स्मः ये अस्माकम् आवश्यकताः प्रति बहुसंवेदनशीलाः आसन्। यैनब्रेमेनस्य पार्थिवशाहस्य च चित्राणामपि पुस्तके प्रयोगः कृतः अस्ति। मृत्युंजयचटर्जी प्रारम्भे अस्माकं कृते पाठानां सज्जायाः आवरणस्य च विषये महत्त्वपूर्णान् परामर्शान् दत्तवान् तथा च सोहनपालेन स्वसमस्तक्षमतया कौशलेन अपि च समर्पणेन

सह एतस्य पुस्तकस्य कृते अन्तिमं स्वरूपं दत्तवान् यस्मात् कारणात् लेखकसमूहस्य अजस्रपरिश्रमः अस्मिन् रूपेण पुरतः आगतः। अरविंदसरदाना इत्यस्य दिप्ताभोगस्य च व्यापकानुभवैः एतस्य पुस्तकस्य अन्तिमरूपार्थं साहाय्यं लब्धम्।

सेंटर-फॉर-दा-स्टडीज- ऑफ-डेवलपिंग-सोसायटीज(सी.एस.डी.एस.) इति एकलव्य-शैक्षिक-शोध-नवाचार-संस्थानं मध्यप्रदेशः-निरन्तरं जेंडरशिक्षासन्दर्भसमूहः तथा च अंकुर-सोसायटी-फॉर- ऑल्टरनेट्विज-इन-एजुकेशन इति एतस्य पुस्तकस्य सज्जीकरणे महत्त्वपूर्णं दायित्वं निरूढवान्। ते अस्माकं याचनायाः आवश्यक्तायाः च अनुरूपं यथासम्भवं सहयोगं कृतवन्तः । श्रीअधिकारी विकासः सचिनः घनश्यामः च (सी.एस.डी.एस.), दिनेशपटेलः (एकलव्यः) शालिनीजोशी मालिनीघोषः वी.टी.प्रसन्ना अनिलहासदा च नैरन्तर्येण अस्माकं साहाय्यं कृतवन्तः।

एतैः जनैः सार्धं बहवः अभिभावकाः शिक्षकाः विद्यार्थिनः च ये एतस्य पाठ्यपुस्तकस्य विषये जानन्ति स्म ते अपि एतस्यां प्रक्रियायां सम्मिलिताः। एतस्मात् कारणात् वयं नूतनैः विचारैः बालकानां परिचयं कारयितुं समर्थाः अभवाम। वयं राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदः नवदेहल्याः अपि अधमर्णाः स्मः येषां कारणतः इदं कार्यं सम्भवमभूत। एतस्य विषये परामर्शाः टिप्पणीः च सादरम् आमन्त्रिताः सन्ति।

एतस्य पुस्तकस्य निर्माणसहयोगं दातुं सवितासिन्हा प्रोफेसरः अध्यक्षः च डी.ई.एस.एस.एच., एन.सी.ई.आर.टी. इत्यस्य कृते विशेषरूपेण धन्यवादज्ञापनं कर्तुमिच्छामः।

वयं पुस्तकस्य विकासे विभिन्नचरणेषु सहयोगाय अरविंदशर्मणः डी.टी.पी.आपरेटरस्य सुनयनातिवारीवर्यायाः सीनियर-प्रूफ-रीडर इत्यस्याः च विशेषरूपेण कृतज्ञाः स्मः।

प्रकाशनविभागद्वारा अस्मभ्यं पूर्णसहयोगः सुविधाः च प्राप्ताः सन्ति एतदर्थं वयं तेषाम् आभारिणः स्मः।

# पुस्तक-प्रयोगं कथं कुर्याम

**"सामाजिकराजनैतिकजीवनम्" किमर्थम् ?**

ये सदस्याः राष्ट्रियपाठ्यचर्यायाः २००५ इत्यस्याः रूपरेखां सज्जीकृतवन्तः तेषां विचारः आसीत् यत् नागरिकशास्त्रविषयः कश्चित् विशेषौपनिवेशिकात् अतीतात् निर्गतः अस्ति एतस्मात् एतस्य परिवर्तनस्य आवश्यकता अस्ति। पाठ्यचर्यायाः समितेः सदस्याः इदमपि ज्ञातवन्तः यत् नागरिकशास्त्रम् अधुना यावत् केवलं सर्वकारिसंस्थानां कार्यक्रमाणां च विवरणदाने एव केन्द्रितम् आसीत्। अयं विषयः अनेन प्रकारेण लेखनीयम् आसीत् यस्मिन् आलोचनात्मकदृष्टिकोणः समाहितः भवेत्। एतस्य सूचनायाः अन्तर्गतं कश्चित् नूतनः विषयः प्रादुर्भूतः "सामाजिकराजनैतिकजीवनम्"। एतेन नूतनेन विषयेण सामाजिकराजनैतिकार्थिकजीवनानां विभिन्नान् पक्षान् सम्मेल्य स्वक्षेत्रस्य विस्तारः कृतः।

**सामाजिक-जीवनं राजनैतिक-जीवनञ्च कथं परस्परं भिन्ने स्तः?**

अस्मिन् पुस्तके किञ्चित् पृथग्रूपं चिन्तनं स्वीकृतम् अस्ति यस्य स्पष्टीकरणस्य प्रयासं वयं कृतवन्तः। एतस्मिन् त्रयाणां तत्त्वानां सम्मिश्रणमस्ति।

१. बालकाः दृढानुभवानां माध्यमेन सम्यक् प्रकारेण शिक्षन्ते। एतं विचारं केन्द्रे स्थापयित्वा अयं प्रयासः कृतः अस्ति यत् संस्थासु प्रक्रियासु च चर्चा काल्पनिकवृत्तान्तानाम् अथवा केसस्टडी इत्यस्योपरि अथवा तेषाम् अभ्यासानाम् आधारेण भवेत् ये बालकानां स्वानुभवैः सम्बद्धाः भवेयुः।

२. अवधारणानां बालकाः अनेन प्रकारेण परिचयं प्राप्नुयुः यस्मात् तेषाम् अवबोधः भवेत् ते केवलं तथ्यानि सूचनाः च यावत् एव सीमिताः न भवेयुः। एतदर्थं ये उपायाः कृताः सन्ति ते सूचनानां निकषः। पाठे अभ्यासे च बालकेभ्यः एतादृशाः प्रश्नाः प्रदत्ताः सन्ति ये प्रश्नाः तान् चिन्तयितुं प्रेरयेयुः तथा च परिभाषाः न्यूनातिन्यूनरूपेण स्थापिताः सन्ति।

३. बालकाः सामाजिकाभिः पारिवारिकाभिः संरचनाभिः सह घनिष्ठरूपेण युक्ताः भवन्ति। एतत्तथ्यं मनसि निधाय वयं प्रयासं कृतवन्तः यत् विभिन्नेषु विषयेषु चर्चां कुर्वन्तः आदर्शः यथार्थसन्तोलनं च भवेत्।

४. बालकाः बाह्यानुभव-पुरस्सरं कक्षां प्रविशन्ति। एतस्मिन् पुस्तके विषयेषु येन प्रकारेण चर्चा कृता अस्ति सा चर्चा बालकानां ज्ञाने अभिवृद्धिं करोति। तथा च अवबोद्धुं निरीक्षयितुं च अवसरं प्रददाति। पुस्तके यथार्थं दर्शितमस्ति। एतेन सहैव इदं वर्णितमस्ति यद् वयम् आदर्शस्थितिं प्रति कथं वर्धितुं शक्नुमः। तेषामादर्शाणाम् उपरि बलाघातः कृतःअस्ति ये संविधाने निहितमूल्यानामुपरि आधारिताः सन्ति। एतेषां मूल्यानां कृते जनैः यः सङ्घर्षः कृतः ते अपि आधारभूताः सन्ति।

इदं पुस्तकं चतुर्षु घट्टेषु विभक्तमस्ति ये घट्टाः विभिन्नावधारणासु प्रकाशं निक्षिपन्ति। एते सन्ति– विविधताः, सर्वकारः, स्थानीयसर्वकारः प्रशासनम्, आजीविका च। प्रत्येकं घट्टे एकाधिकाः पाठाः सन्ति ये एतासु अवधारणासु विस्तरेण चर्चां कुर्वन्ति।

**(१) प्रत्येकं पाठस्य प्रारम्भः**

प्रत्येकं पाठः द्वाभ्यां तत्त्वाभ्यां प्रारभते यस्य माध्यमेन बालेषु तं पाठं प्रति रुचिः तस्य विषये च अधिकं ज्ञातुम् उत्सुकता जायते। प्रथमं तत्त्वम् अस्ति परिचयात्मकः भागः यः सम्पूर्णस्य पाठस्य किञ्चिद् दर्शनं कारयति यत् अयं पाठः केषु मुख्यविन्दुषु चर्चां करिष्यति। बालकानां कृते तेषां जिज्ञासावर्धनाय प्रश्नाः प्रदत्ताः सन्ति तथा च एतादृशाः प्रश्नाः अपि सन्ति ये बालकानां कृते तेषाम् अनुभवैः विषयैः च सम्बद्धतायाः अवसरं कल्पयन्ति। अपरं तत्त्वम् अस्ति प्रत्येकं पाठे आदौ एव आगन्ता किञ्चिद् बृहच्चित्रं यस्य साहाय्येन बालः इदमनुभवं प्राप्स्यति यत् पाठः कस्मिन् विषये अस्ति। एषा आशा अस्ति यत् कक्षायां पाठनकाले शिक्षकः पुस्तके प्रदत्तप्रश्नैः चित्रैः च साकं स्वस्य प्रश्नानां चित्राणां च प्रयोगं करिष्यति।

**द्वितीयः अध्यायः**

# विविधता तथा च भेदभावः

*गते पाठे भवन्तः विविधतायाः विषये पठितवन्तः कदाचित् ये जनाः अन्येभ्यः भिन्नाः भवन्ति तेषां परिहासः क्रियते । तथा च ते बहुषु गतिविधिषु अथवा समूहेषु सम्मिलिताः न क्रियन्ते । यदि अस्माकं मित्राणि अथवा अन्ये जनाः अस्माभिः सार्धम् अपि एतादृशं व्यवहारं कुर्युः दुःखम् अनुभवेम तेभ्यः कुप्येम तथा च वयम् असहायाः इति अनुभवेम । किं भवन्तः कदाचित् चिन्तितवन्तः यत् इत्थं किमर्थं भवति ?*

*अस्मिन् पाठे वयम् इदम् अवगन्तुं प्रयासं करिष्यामः यत् एतादृशाः अनुभवाः अस्माकं समाजेन सह तथा च अस्माकं परिवेशे विद्यमानाभिः असमानताभिः सह कथं सम्बद्धाः सन्ति ।*



**(२) पाठस्य मध्यस्थाः प्रश्नाः अभ्यासाः च**

भवन्तः द्रक्ष्यन्ति यत् प्रत्येकं पाठे कानिचन वर्णयुक्तानि कोष्ठकानि प्रदत्तानि सन्ति येषु चर्चार्थं केचन विषयाः सन्ति केचन प्रश्नाः प्रदत्ताः सन्ति केचन अभ्यासाः अपि प्रदत्ताः सन्ति । एतेषां सर्वेषाम् अनेके प्रयोगाः सन्ति- प्रथमं तु अयम् अस्ति यत् शिक्षकः अनुमीयेत् यत् विद्यार्थी कक्षायां पाठितपाठं कियन्तं ज्ञातवान् इति ।

हेक्टरः तस्य मित्रं च किं तथ्यं विरुध्य संघर्षं कुर्वन्ति स्म ? अश्वेतजनाः कथं भेदभावस्य सम्मुखीकरणं कुर्वन्ति स्म, एतस्य सूचीं कुर्वन्तु –

1.
2.
3.

3. केनचित् शाकविक्रेत्रा सह वार्तां कुर्वन्तु तथा च जानन्तु यत् सः निजकार्यं कथं करोति- सज्जा, क्रयणं, विक्रयाणादिकम् इति ।
4. बच्चुः इत्यनेन एकदिनस्य अवकाशग्रहणात् पूर्वमपि चिन्तनीयं भवति, इत्थं किमर्थमस्ति ?

अधोलिखिततालिकायां प्रदत्तकथनानाम् उपरि दृष्टिपातं कुर्वन्तु। किं भवत्यः परिचेतुं शक्नुवन्ति यत् ते सर्वकारस्य केन स्तरेण सम्बन्धिताः सन्ति? तेषां पुरतः चिह्नं कुर्वन्तु।

| | स्थानीयः | राज्यम् | राष्ट्रियः |
|---|---|---|---|
| भारतसर्वकारस्य रूसेनदेशेन सह मैत्री-सम्बन्ध-स्थापनस्य निर्णयः | ० | ० | ० |
| जम्मूभुवनेश्वरयोः मध्ये नवीनरेलसेवारम्भयस्य निर्णयः | ० | ० | ० |
| पश्चिमबंगालसर्वकारस्य सर्वेषु सर्वकारीयेषु विद्यालयेषु अष्टमकक्षायां परिषदः परीक्षां स्वीकर्तुं निर्णयः | ० | ० | ० |

*द्वितीयः समीरः विद्यालयं किमर्थं न गच्छति स्म ? भवतां चिन्तनानुसारं यदि सः विद्यालयं गन्तुमिच्छेत् तर्हि किम् सः पारयेत् ? किमेतत् समीचीनमस्ति यत् केचन बालाः विद्यालयं गन्तुं प्रभवन्ति तथा च केचन गन्तुमेव न प्रभवन्ति ? एतस्मिन् विषये चर्चां कुर्वन्तु ।*

अपरः विषयः अयमस्ति यत् विद्यार्थिनाम् अनुभवविषये तेषां याः अवधारणाः सन्ति तासां वर्धनं स्यात् । तृतीयः अयं विषयः वर्तते यत् पूर्वं विद्यार्थी पाठितविषयान् स्मरेत् तथा च वर्तमानकालिके पाठे तेषां प्रयोगं कुर्यात् ।

रिक्ते कोष्ठके चर्चार्थं प्रदत्तानां विषयाणां तात्पर्यम् अस्ति यत् बालाः समूहे चर्चां कुर्युः पश्चाच्च सम्पूर्णकक्षायां श्रावयेयुः । चर्चायाः कृते ये विषयाः प्रदत्ताः सन्ति ते मुख्यरूपेण बालकानाम् अनुभवानाम् उपरि केन्द्रिताः सन्ति येन बालकानाम् अवधारणायाः ज्ञानस्य विस्तारः भवेत् । अतः समयस्य अभावे सत्यपि एतेषु ध्यानम् अवश्यम् एव दातव्यम् ।

## (3) अभ्यासः

पाठोत्तरप्रश्नानां निर्माणसमये इदं ध्यानं दत्तमस्ति यत् विद्यार्थिनः स्वज्ञानस्य विस्तारं कर्तुं शक्नुयुः पाठस्य विषयवस्तुनः केवलं रटनं प्रयोजनं नास्ति । विद्यार्थी स्वकीयैः भावैः प्रश्नानाम् उत्तरं लिखेत् एतदर्थं सः प्रोत्साहनीयः ।

**अभ्यासः**

1. आरक्षकाणां किं कार्यं भवति ?
2. राजस्वाधिकारिणः कार्यद्वयं वदतु ।

विभिन्नप्रकारकाणां प्रश्नानां संक्षिप्तविवरणम् अधः लिखितमस्ति ।

- केचन प्रश्नाः एतस्मिन् विषये बलाघातं कुर्वन्ति यत् विद्यार्थिनः पाठस्य प्रमुखबिन्दून् विशिष्टप्रकारेण आवर्तेरन् ।
- केचन प्रश्नाः एतादृशाः सन्ति ये विद्यार्थिनः अनुभवाधारितोत्तराणि दातुं प्रेरयन्ति ।
- केचन एतादृशाः प्रश्नाः सन्ति ये प्रदत्तसूचनायाः आधारेण विद्यार्थिभिः साकं तोलनां कर्तुं कथयन्ति ।
- केचन प्रश्नाः तादृशाः सन्ति येषां प्रयोजनमस्ति यत् विद्यार्थिनः तासां परिस्थितीनां कल्पनां कुर्युः यासां विषये ते पठितवन्तः सन्ति । एते प्रश्नाः ताभ्यः विशेषपरिस्थितिभ्यः सञ्जातानां विषयाणां प्रतिक्रियाः अभिलषन्ति ।

5. अधोलिखिततालिकायाम् आपणानां कार्यालयानां च नामानि पूरयन्तु – यत् ते कीदृशानि वस्तूनि प्रापयन्ति अथवा कीदृशानि सेवाकार्याणि कुर्वन्ति ?

| आपणानां कार्यालयानां च नामानि | वस्तूनां सेवानां च प्रकाराः |
|---|---|
| ------------------------------- | ------------------------- |
| ------------------------------- | ------------------------- |

- केचन तादृशाः अन्यप्रकारकाः प्रश्नाः सन्ति येषु चित्राणाम् उपयोगः क्रियते । तेषाम् आधारेण विद्यार्थिनः एतस्य वर्णनं कुर्वन्तु यत् चित्रे किं दृश्यते तत् च प्रदत्तेन पाठेन कथं सम्बद्धम् अस्ति ?

6. अधोलिखिततालिकां पूरयन्तः शेखरस्य रामलिङ्गमस्य स्थितीनां परस्परं तोलनं कुर्वन्तु –

| | **शेखरः** | **रामलिङ्गमः** |
|---|---|---|
| कर्षितभूमिः | ----------- | ------------ |
| श्रमिकाणाम् आवश्यकता | ----------- | ------------ |
| सस्यविक्रयणम् | ----------- | ------------ |

• 5. अधोलिखितवार्तां पठन्तु तथा च प्रश्नोत्तराणि यच्छन्तु, ---

*एतस्याः घटनायाः विषये सूचना तदा प्राप्ता यदा केचन जनाः व्रडितं लाड इत्येतं चिकित्सार्थं चिकित्सालयं प्रति नीतवन्तः । आरक्षकप्राथमिक्यां लाडः लेखितवान् यत् तमुद्दिश्य आक्रमणं तदा जातं यदा सः टैंकर इत्यस्मात् जलं पूरयति स्म । टंकी इति निमोनग्रामपंचायतस्य जलापूर्तियोजनान्तर्गतं निर्मिता आसीत् यतः जलस्य समानरूपेण वितरणं स्यात् । परन्तु लाडः आरोपयति स्म यत् उच्चजातीयाः जनाः विरोधं कुर्वन्ति स्म, ते कथयन्ति स्म यत् टैंकरजले दलितजातीयानाम् अधिकारः नास्ति इति ।*

*इण्डियन-एक्सप्रेस इत्यस्य काचित् वार्ता – 1 मई 2004*

*क) लाडः किमर्थं ताडितः ?*

*ख) किं भवन्तः अनुभवन्ति यत् इदं प्रकरणं भेदभावसम्बद्धम् अस्ति ?*

5. चर्चां कुर्वन्तु

उपरितनचित्रयोः अवकरचयनस्य तस्य निस्तारणस्य च विभिन्नविधीनां विषये दृष्टवन्तः।

1. भवतां चिन्तनानुसारं कः विधिः अवकरनिस्तारकस्य जनस्य कृते समुचितः अस्ति।



विभिन्नप्रकारकाः एते प्रश्नाः शिक्षकाणाम् एतस्मिन् विषये साहाय्यं करिष्यन्ति यत् शिक्षकाः अवगच्छेयुः यत् विद्यार्थिनः अवधारणाः ज्ञातवन्तः अपि च ते ताभिः सार्धं सम्बद्धाः अपि जाताः । आशा अस्ति यत् विद्यार्थिनां मूल्याङ्कनं कर्तुं शिक्षकः उपरि प्रदत्तप्रश्नानामनुसारं तेषाम् आधारेण च विविधविषयसमन्वितान् प्रश्नान् स्वयम् अपि रचयिष्यन्ति । केषाञ्चित् प्रश्नानां रटनस्य प्रवृत्तेः सर्वथा त्यागः भवेत् । स्वानुभवस्य व्यक्तीकरणं तथा च विषयेषु चर्चा अवधारणायाः अवगमने ताभिः सार्धं सम्बद्धतायाः कश्चित् भागः अस्ति ।



*अहम् एतं विषयम् परिहासरूपेण स्वीकृतवान् । परिहासः तस्मै जीर्णशीर्णवस्त्रधारिणे बालकाय आसीत् यः जनपथस्य सम्मर्दयुक्ते मार्गे चतुष्पथे रक्तसङ्केतदीपे वार्त्तापत्राणि विक्रीणीते स्म। अहं यदा ततः द्विचक्रिकया गच्छामि स्म सः आङ्गलभाषायाः वार्त्तापत्रं हस्ते उत्तोलयन् .........*

### (४) कथानकानाम् उपयोगः

इदं पुस्तकम् अनेकेषां काल्पनिकानाम् अकाल्पनिकानां च कथानां प्रयोगं करोति यस्मात् विद्यार्थिनः संस्थानां विचाराणां विषये अवगन्तुं सक्षमाः भवेयुः । एतासां कथानां प्रयोगः विद्यार्थिषु चर्चाम् अन्तःदर्शनं च वर्धितुं भवेत् । अयमेव प्रयासः अस्ति यत् विद्यार्थिनः आत्मानं कथया सार्धम् अधिकाधिकरूपेण योजयेयुः ।

**बच्चुमांझी – कश्चन त्रिचक्रिकाचालकः**

अहं बिहारस्य कस्माच्चित् ग्रामात् आगतः अस्मि यत्र अहं शिल्पिकार्यं करोमि स्म । मम भार्या पुत्रत्रयं च ग्रामे निवसति । अस्माकं पार्श्वे कृषिभूमिः नास्ति । ग्रामे शिल्पिकार्यम् अपि निरन्तरं न लभ्यते यद् अर्जनं करोमि स्म तेन कटुम्बपालनं समीचीनतया न भवति स्म ।



केषुचित् पाठेषु वयं विद्यार्थिनः स्वानुभवेषु कथानकं लेखितुं उक्तवन्तः। कथानकस्य लेखनकाले विद्यार्थिनः अधिकाधिकमात्रायां सर्जनात्मकतायाः कृते प्रेरणस्य आवश्यकता अस्ति। शिक्षकैः एतद् अपि इच्छामः यद् ते अन्येषु विषयेषु पाठ्यमानाभिः अवधारणाभिः सम्बन्धं स्थापयिष्यन्ति।

कल्पनां करोतु यत् भवान् कश्चन चित्रकारः कथाकारः वा अस्ति यः तस्मिन् स्थाने निवसति। एतादृशस्य स्थानस्य विषये कथां लिखतु अथवा चित्रं करोतु।

किं भवती चिन्तयति यत् भवती एतादृशस्थलेषु निवसति चेत् आनन्दम् अनुभविष्यति ? तेषां पञ्चानां वस्तूनां सूचीं निर्मातु येषां न्यूनता तत्र अधिकं अनुभविष्यति।

### (५) छवीनाम् उपयोगः

एतस्मिन् पुस्तके अनेकानि चित्राणि सन्ति। एतानि सर्वाणि पाठ्यसामग्रीवत् पाठस्य अभिन्नाङ्गभूतानि सन्ति। अपि च आशासे पाठ्यसामग्र्याः अवबोधनकाले शिक्षकः एतेषां चित्राणाम् उपयोगं करिष्यन्ति। सार्धमेव एतेभ्यः चित्रेभ्यः बालाः










एतादृशीनां परिस्थितीनां अवगमने साहाय्यं प्राप्स्यन्ति याः तेषां कृते अपरिचिताः सन्ति। शिक्षकाणां कृते अयं परामर्शः अस्ति यत् ते पुस्तकालयतः समाचारपत्रतः पत्रिकाभ्यः अन्तर्जालतः उपलभ्यमानानां चित्राणामपि प्रयोगं कुर्युः।

### (६) भाषायां लैङ्गिकी संवेदनशीलता

एतस्मिन् पुस्तके बालकान् सम्बोधयन् केषुचित् पाठेषु केवलं स्त्रीलिङ्गरूपाणामेव प्रयोगः कृतः अस्ति। यथा एतत् वाक्यं पश्यन्तु"किं कापि एतादृशं मित्रम् अस्ति या भवत्तुल्या दृश्यते?" सामान्यरूपेण एतस्य लेखनं

भविष्यति "किं कोऽपि एतादृशं मित्रम् अस्ति यः सर्वतः भवत्तुल्यः दृश्यते ।, अत्र मित्रम् इति शब्दे बालकस्य बालिकायाः च अपि ग्रहणमस्ति परन्तु तस्मात् पूर्वं 'कश्चित्, इत्यस्मात् इत्थं प्रतिभाति यत् केवलं बालकानामेव चर्चा भवति । केवलम् अस्माकं भाषायामेव न अस्माकं जीवने प्रत्येकं पक्षतः बालिकानां न्यूनता तथा च बालिकाः प्रति असमानतायाः भावः दृश्यते । एतस्यामवस्थायाम् अस्माभिः अर्थात् असमानतायाः भावस्य निराकरणार्थम् अस्मिन् पुस्तके बालिकानां कृते स्थानं प्रदत्तमस्ति तथा च भाषायाः मान्यरूपाणि अपि परिवर्तितानि सन्ति । एतद् भवितुं शक्नोति यत् आदौ एतद् विपरीतं प्रतिभूयात् परन्तु अयं प्रयासः नास्ति यत् बालकानां पुरुषाणां च अवहेलनं स्यात् । परन्तु तासां सर्वासां बालिकानां कृते स्थानदानस्य प्रयासः अस्ति याः वर्षेभ्यः अस्माकं भाषातः कार्यक्षेत्रतः च लुप्ताः सन्ति ।



**(७) अन्येषां साधनानाम् उपयोगः**

पाठ्यपुस्तकं महत्त्वपूर्णं भवति परन्तु तत् एतादृशं साधनमस्ति यत् कक्षायां प्रयुक्तसाधनेषु एकमस्ति । विद्यार्थिनः पाठ्यपुस्तकस्य अध्ययनेन साकम् अन्यपाठ्यसामग्र्याः अपि यथा अध्ययनं कुर्युः तथा ते प्रेरणीयाः सन्ति । यथा समाचारपत्रं हास्यचित्रं च ।

स्थितिःसम्यक् नास्ति । अवश्यं पार्श्वस्थे ग्रामे नलात् जलम् आगच्छत् स्यात् ।

**भित्तिचित्राणां प्रतिबन्धः स्यात्**

भित्त्याः उपरि संश्लेषितानि चित्राणि कस्यापि नगरस्य सौन्दर्यं नाशयन्ति । बहुधा चित्राणि महत्त्वपूर्ण-स्थानेषु साइनफलके च संश्लिष्यन्ते। राजमार्गस्य मानचित्रेषु अपि ते संश्लिष्यन्ते। सर्वाणि राजनैतिक-दलानि एतेषां चित्राणां प्रयोगे सहपरामर्शं कृत्वा प्रतिबन्धं स्थापयन्तु ।